# अथ पञ्चदशः सर्गः

कृतक्रियं ज्ञातशमप्रभावं व्रजन्तमेकं सपरिच्छदप्रभम्।
निभाल्य कश्चिच्छ्रमणः कृताञ्जलिस्तथागतं वाक्यमिदं जगाद।।1।।

आसक्त्यधीनेषु भवाननारतो दुरिन्द्रियाश्वेषु तथा जितेन्द्रियः।
प्रज्ञा नवीना रसमाधुरीभरा तुष्टाकृतिश्चन्द्रकलेव भाति ते।।2।।

प्रदीप्तधीरेन्दुमुखस्य ते कुतः सिद्धिर्गुरुः को विजितेन्द्रियस्य।
वृष्णाक्ष तद् ब्रूहि कृतार्थसाधन श्रोतुं मनो वाञ्छति मे दयानिधे।।3।।

कश्चिद् गुरुर्मे न च मान्य एव निन्द्यस्तु नैवास्ति जनेषु भिक्षुक।
जानीहि धर्मे च स्वयम्भुवं मनागवाप्तनिर्वाणमनन्यसम्मितम्।।4।।

बुद्धोऽस्मि निःशेषतयावबोध्याननन्यवद् भिक्षुक तान् विदित्वा।
मया जिताः क्लेशगणाः प्रतीपाः जानीहि मां तेन शमात्मकञ्च।।5।।

वाराणसीं सौम्य ततो व्रजाम्यहं निनादयिष्यन्निजधर्मदुन्दुभिम्।
न गर्वतो वा यशसे सुखाय वा दुखार्दितानां तु सदा हिताय।।6।।

मया प्रतिज्ञातमिमं हि लोकं निभाल्य दुःखार्णववीचिमग्नम्।
संतारयिष्यामि तटं प्रयातः मुक्तान् विधास्यामि जनान् प्रमुक्तः।।7।।

प्राप्य श्रियं स्वार्थपरो जगत्यां जनो विजिह्रेति सदानुरक्तः।
उन्मीलिताक्षस्तु धनं विशिष्टं लब्ध्वा वितीर्यं हि जनेषु वेत्ति।।8।।

दृढस्थलस्थो यदि पूरमग्नं कृष्णाति नद्याः न हि नास्ति शूरः।
अवाप्तसम्पत्तिरथो दरिद्रान् न धारयेच्चेन्न हि सोऽस्ति दाता।।9।।

स्वस्थैर्यथा व्याधियुतो मनुष्यः चिकित्सितव्यः सुलभोपचारैः।
सन्मार्गयातश्च तथैव योजयेद् गम्येन मार्गेण कुमार्गिणो जनान्।।10

यथा प्रदीप्तेन हि दीपकेन घनान्धकारो भवति प्रणष्टः।
प्रदीप्तबुद्धिज्वलने च बुद्धे लोके जनः कामवशो न भूयात्।।11।।

काष्ठे यथाग्नेर्गगने च वायो रसस्य नित्यं स्थिरता धरायाम्।
प्राप्तिः प्रबुद्धेर्नियता गयायां काश्यां च सत्संगतिरादिभूता।।12।।

निशम्य बुद्धस्य वचः स एवं विसृज्य तं स्वेष्टदिशं जगाम।
उत्कण्ठितोन्मीलितलोचनाभ्यां विलोकयँश्च प्रणमँश्च भूयः।।13।।

बुद्धेन तेन व्रजता सुरम्या दृष्टाब्जकोशप्रमितेव काशी।
वराणसीविष्णुनखाग्रजाभ्यामालिङ्गितेव प्रमदा सखीभ्याम्।।14।।

सूर्यप्रभोऽसौ मृगपत्तनं वनं शक्तिप्रभागौरवदीप्तकान्तः।
मुनिर्ययौ कोकिलनादरम्यं महीरुहाढ्यं मुनिभिर्निषेवितम्।।15।।

कौण्डिन्यवंश्यश्च महाह्वयश्च बाष्पाश्वजिद्भद्रजिताश्च पञ्च।
आयान्तमालोक्य विभाव्य बुद्धं परस्परालापरता बभूवुः।।16।।

भिक्षो समागच्छति गौतमोऽयं सुखानुरक्त्या तपसः परिच्युतः।
न वन्दनीयो न च योजनीयः सम्माननीयो न व्रताद्वियुक्तः।।17।।

तथापि संलप्तुमयं यदीच्छेत् तथा विधास्याम वयं समेताः।
कर्तव्यमार्यैरिदमेव लोके सदा मनुष्यैर्गृहमागतं प्रति।।18।।

अथोपविष्टान् प्रति भिक्षुकाँस्तान् यथा यथायान्निकषा प्रबुद्धः।
तथा तथा ते दृढनिश्चयव्रताः विखण्डयामासुरिव व्रतानि।।19।।

कश्चित्तु जग्राह कषायचीवरं पात्रञ्च कश्चित् प्रणतः कृताञ्जलिः।
चकार कश्चित् सुगतस्य चासनं पाद्यं ददौ कश्चिदहो तथैव।।20।।

अनेकधा तं परिचेरुरुद्यताः गुरुं न मत्वापि तथापि जह्रुः।
विज्ञापयन् सौगतनामगोत्रे ततो दयार्द्रो भगवानुवाच।।21।।

ब्रूतैवमेवं न हि भिक्षवोऽधुना पूज्यार्हतं वाचममूं विगर्हिताम्।
निन्दाप्रशंसासु समोऽस्मि युष्मान् पापोपलिप्तान् विदधातुमीशः।।22।।

जगद्धितायाप्तसमस्तबोधो बुद्धः सदा प्राणिहितं विधत्ते।
गुरोश्च नामग्रहणेन पित्रोर्जनोऽवमन्तेव जहाति धर्मम्।।23।।

तत्रोपदिष्टा वदतां वरेण महर्षिणा तेन दयान्वितेन।
अतत्त्वबोधाच्च विमार्गितास्ते प्रोचुर्हसन्तोऽथ विमूढचित्ताः।।24।।

ज्ञातं विशिष्टैर्भवता न तत्त्वं तपोभिरुग्रैः परमं सुखप्रिय।
लक्ष्ये च लभ्ये परिदेवनेन ब्रूषे कथं लब्धमसौ मयेति।।25।।

अप्रत्यये चाभ्युदिते महात्मा संबोधिसत्ये हृदि भिक्षुकाणाम्।
व्याख्यात् स्वकीयं खलु बोधिमार्गं तपोमयादाप्तमसौ तथागतः।।26।।

यथेन्द्रियार्थेषु रतं तथैव बुद्धस्व मूढं ह निजन्तुदञ्च।
दोषाशयौ द्वावपि नामरत्वं मार्गौ गृहीतौ नयतः समन्तात्।।27।।

शारीरकष्टैः क्षुभिते च चित्ते तपोभिरज्ञानमलेऽनपाकृते।
विलुप्तलोकव्यवहारबोधे भायात् कुतस्तत्त्वमतीन्द्रियार्थम्।।28।।

तमोविनाशाय जलप्रपातो न वा प्रकाशाधिगमाय लोके।
ज्ञानाग्निनाज्ञानतमोविघाते शारीरकष्टं न च पूर्वहेतुः।।29।।

यथानलार्थी न भिनत्ति काष्ठं प्राप्नोति सम्यग् विधिनैव वह्निम्।
योगेन लभ्यं हि तथामृतं पदं न क्लेशजातेन कदापि लभ्यम्।।30।।

कामे समासक्तधियां जनानां रजस्तमोभ्यां मलिनायते हृत्।
शक्ता न शास्त्रावगमे कथन्ते विद्युर्विरागं च निरोधमार्गम्।।31।।

अश्नन्नपथ्यं हि रुजाभिभूतो यथा भवेत् नैव कदापि नीरुक्।
कामानुरक्तस्य तथा कुतः स्यादज्ञानरोगप्रशमो जनस्य।।32।।